# શ્રીદત્તાત્રેયાષ્ટકમ્

shrIdattAtreyAShTakam

sanskritdocuments.org

August 12, 2018

# shrIdattAtreyAShTakam

# શ્રીદત્તાત્રેયાષ્ટકમ્

## Sanskrit Document Information

Text title : dattAtreyAShTakam

File name : dattAtreyAShTakam.itx

Category : deities_misc, dattatreya, aShTaka

Location : doc_deities_misc

Transliterated by : NA

Proofread by : NA, Sunder Hattangadi sunderh at hotmail.com

Latest update : August 12, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 12, 2018

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયાષ્ટકમ્

શ્રીદત્તાત્રેયાય નમઃ ।
આદૌ બ્રહ્મમુનીશ્વરં હરિહરં સત્ત્વં-રજસ્તામસં
બ્રહ્માણ્ડં ચ ત્રિલોકપાવનકરં ત્રૈમૂર્તિરક્ષાકરમ્ ।
ભક્તાનામભયાર્થરૂપસહિતં સોઽહં સ્વયં ભાવયન્
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૧॥

વિશ્વં વિષ્ણુમયં સ્વયં શિવમયં બ્રહ્મામુનીન્દ્રોમયં
બ્રહ્મેન્દ્રાદિસુરાગણાર્ચિતમયં સત્યં સમુદ્રોમયમ્ ।
સપ્તં લોકમયં સ્વયં જનમયં મધ્યાદિવૃક્ષોમયં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૨॥

આદિત્યાદિગ્રહા સ્વધાઋષિગણં વેદોક્તમાર્ગે સ્વયં
વેદં શાસ્ત્ર-પુરાણપુણ્યકથિતં જ્યોતિસ્વરૂપં શિવમ્ ।
એવં શાસ્ત્રસ્વરૂપયા ત્રયગુણૈસ્ત્રૈલોક્યરક્ષાકરં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૩॥

ઉત્પત્તિ-સ્થિતિ-નાશકારણકરં કૈવલ્યમોક્ષપ્રદં
કૈલાસાદિનિવાસિનં શશિધરં રુદ્રાક્ષમાલાગલમ્ ।
હસ્તે ચાપ-ધનુઃશરાશ્ચ મુસલં ખટ્વાઙ્ગચર્માધરં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૪॥

શુદ્ધં ચિત્તમયં સુવર્ણમયદં બુદ્ધિં પ્રકાશોમયં
ભોગ્યં ભોગમયં નિરાહતમયં મુક્તિપ્રસન્નોમયમ્ ।
દત્તં દત્તમયં દિગમ્બરમયં બ્રહ્માણ્ડસાક્ષાત્કરં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૫॥

સોઽહંરૂપમયં પરાત્પરમયં નિઃસઙ્ગનિર્લિપ્તકં
નિત્યં શુદ્ધનિરઞ્જનં નિજગુરું નિત્યોત્સવં મઙ્ગલમ્ ।
સત્યં જ્ઞાનમનન્તબ્રહ્મહૃદયં વ્યાપ્તં પરોદૈવતં

સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૬॥

કાષાયં કરદણ્ડધારપુરુષં રુદ્રાક્ષમાલાગલં
ભસ્મોદ્ધૂલિતલોચનં કમલજં કોલ્હાપુરીભિક્ષણમ્ ।
કાશીસ્નાનજપાદિકં યતિગુરું તન્માહુરીવાસિતં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૭॥

કૃષ્ણાતીરનિવાસિનં નિજપદં ભક્તાર્થસિદ્ધિપ્રદં
મુક્તિં દત્તદિગમ્બરં યતિગુરું નાસ્તીતિ લોકાઞ્જનમ્ ।
સત્યં સત્યમસત્યલોકમહિમા પ્રાપ્તવ્યભાગ્યોદયં
સોઽહં દત્તદિગમ્બરં વસતુ મે ચિત્તે મહત્સુન્દરમ્ ॥ ૮॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં શ્રીદત્તાષ્ટકં સમ્પૂર્ણમ્ ।
શ્રીગુરુદત્તાત્રેયાર્પણમસ્તુ ।

The attribution of the stotra to Shankaracharya may be doubtful
as with some other compositions.

Proofread by Sunder Hattangadi sunderh at hotmail.com

*shrIdattAtreyAShTakam*

pdf was typeset on August 12, 2018

Please send corrections to *sanskrit@cheerful.com*